http://www.sgbauonline.com/



# M.A. (Part–II) (Semester—III) Examination
# SANSKRIT
## Paper—IV
## (Sarvasadharan)

Time : Three Hours] [Maximum Marks : 80

**सूचना** :— अन्यथा निर्देशाभावे स्वीकृतभाषयैव लिखत।

1. कमपि **एकं** विषमधिकृत्य निबन्धलेखनं कुरुत : 16

   (1) संस्कृतिः संस्कृताश्रिता

   (2) सन्तशिरोमणिः श्रीज्ञानेश्वरः

   (3) मानवमित्रं सङ्गणकः

   (4) शरीरमाद्यं खलु धर्मसाधनम्।

2. (अ) वक्तृत्वस्पर्धायां प्रथमक्रमाङ्कं प्राप्तवन्तं मित्रं प्रति अभिनन्दनपरं पत्रं लिखतु। 8

**अथवा**

मातुः जन्मदिनावसरे शुभेच्छापरं पत्रं लिखतु।

(ब) ''क्रीडास्पर्धायां सहभागार्थं विरामकालस्य आवश्यकता'' इत्यस्मिन् विषये सञ्चालकं प्रति अभ्यर्थनापत्रं लिखतु। 8

**अथवा**

ग्रन्थालये पुस्तकक्रयणार्थं ग्रन्थपालं प्रति आवेदनपत्रं लिखतु।

3. एकस्य परिच्छेदस्य स्वभाषायाम् अनुवादं कुरुत : 16

   (1) अस्मिन् युगे सर्वाणि कार्याणि विज्ञानमयानि जातानि। यावच्च गानं यानं पानमित्यादयः विज्ञानेनैव भवन्ति। सर्वस्मिन् विश्वस्मिन् विज्ञानस्य प्रचारः परिलक्ष्यते। भिन्नानां विभिन्नदूरवर्तिप्रदेशानामपीकृतं दूरभवनं विज्ञानेन। सम्प्रति सर्वत्र गमनं विज्ञानस्योपकारेण भवति। वायुयान-धूमयान-बाष्पयानानि च सन्ति। यैः सर्वे जनाः अल्पक्षणेनैव बहुदूरदेशं यान्ति। सम्प्रति बहुसुलभं 'रेल' इति ख्यातं बाष्पयानम्। रेल इति आंग्लशब्दः लोहनिर्मितलम्बमानपट्टिकायामुपरि बाष्पयानं धावति। सैव रेलेतिनाम्ना कथ्यते। रेल इत्यस्य प्रथमतः आविष्कारः जेम्सवाटनामकेन पाश्चात्येन वैज्ञानिकेन कृतः।

   (2) देशाटनात् अधिकमात्रया ज्ञानवर्धनं भवति। धार्मिकजनानां कृते देशाटनम् तीर्थयात्रायाः रूपे सीमितमस्ति। इदं सीमितरूपेणापि देशाटनं मोक्षस्य परमसाधनं मन्यते। किन्तु व्यापकरूपेण इदं मनोरञ्जनस्यैकमुत्तमं साधनमस्ति। नगरस्य कोलाहलपूर्णवातावरणे निवासिनः नराः प्रकृत्याः क्रोडे स्थितान् ग्रामान् शान्तिगाम्भीर्यपूर्णान् पर्वतान्, मन्दमन्दप्रवाहपूर्णा नदी, कलकलध्वनियुक्तांश्च जलप्रपातान् दृष्ट्वा स्वसंघर्षपूर्णजीवनस्य कटुतां विस्मरन्ति। ग्रामाणां पर्वतानाञ्च शान्तिपूर्णस्थले नूतनस्थलानां दर्शनं मनुष्याणां प्रसन्नतायाः कारणं भवति। यद्यप्यस्मिन् वैज्ञानिके युगे स्वगृहे विद्यमानः नरः सम्पूर्णविश्वस्य ज्ञानं प्राप्नोति। किन्तु अनेन प्रकारेणार्जितं तस्य ज्ञानमपूर्णं भवति।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

4. पद्यांशानाम् अनुवादं कुरुत (केऽपि चत्वारः) : 16

(1) रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवो वसन्ति गगने सर्वेपि नैकादृशाः।
केचिद्वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो म ब्रूहि दीनं वचः।।

(2) विद्या विवादाय धनं मदाय
खलस्य शक्तिः परपीडनाय।
साधोस्तु सर्वं विपरीतमेतद्
ज्ञानाय दानाय च रक्षणाय।।

(3) संपूर्णकुम्भो न करोति शब्दम्
अर्धो घटो घोषमुपैति नूनम्।
विद्वान् कुलीनो न करोति गर्वं
मूढास्तु जल्पन्ति गुणैर्विहीनाः।।

(4) सुख हि दुःखान्यनुभूय शोभते
घनान्धकारेश्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति।।

(5) सिंहः शिशुरपि निपतति
मदमलिनकपोलभित्तिषु गजेषु
प्रकृतिरियं सत्ववतां तेजसां
हे न वयः समीक्ष्यते।।

(6) सर्पा पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम्।।

(7) रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार।।

(8) मृगा मृगैः सङ्गमुपव्रजन्ति
गावश्च गोभिस्तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधयः सुधीभिः
समानशीलव्यसनेषु सख्यम्।।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

5. सुयोग्यम् उत्तरं विचिनुत (केऽपि षोडश) : 16

(1) महाभारते कति पर्वाणि सन्ति ?

(अ) 16 (ब) 18

(क) 12 (ड) 10

(2) 'दिलीपस्य गो-सेवा' रघुवंशस्य कस्मिन् सर्गे वर्णिताऽस्ति ?

(अ) प्रथमसर्गे (ब) तृतीयसर्गे

(क) द्वितीयसर्गे (ड) चतुर्थसर्गे

(3) रामायणस्य प्रणेता कः ?

(अ) वाल्मीकिः (ब) भरतमुनिः

(क) तुलसीदासः (ड) कालिदासः

(4) नन्दिनी कस्याः पुत्री अस्ति ?

(अ) कामधेनोः (ब) वशिष्ठस्य

(क) ब्रह्मणः (ड) इन्द्रस्य

(5) मेघदूते यक्षाणां वसतिः कुत्र अस्ति ?

(अ) हिमनदे (ब) मानसरोवरे

(क) मालभूमी (ड) अलकायाम्

(6) किरातार्जुनीये महाकाव्ये कतिसर्गाः समुपलभ्यन्ते ?

(अ) 22 (ब) 21

(क) 20 (ड) 18

(7) श्रीहर्षस्य कृतिरस्ति :

(अ) नैषधीयचरितम् (ब) उत्तररामचरितम्

(क) मेघदूतम् (ड) रघुवंशम्

(8) 'शतकत्रयम्' कस्य रचना अस्ति ?

(अ) हालस्य (ब) भवभूतेः

(क) अमरूकस्य (ड) भर्तृहरेः

(9) कुमारसम्भवे महाकाव्ये भगवत्याः पार्वत्याः माता का अस्ति ?

(अ) इन्दुमती (ब) मेनाः

(क) सुदक्षिणा (ड) अरुन्धती

(10) 'दशकुमारचरितम्' कस्य कृतिरस्ति ?

(अ) सुबन्धोः (ब) बाणभट्टस्य

(क) दण्डिनः (ड) शुद्रकस्य



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(11) हर्षवर्धनस्य माता अस्ति :

(अ) मालती (ब) सरस्वती

(क) यशोवती (ड) अक्षमाला

(12) 'पत्रलेखा' कस्य पुत्री अस्ति ?

(अ) अश्वकेतो (ब) कुलूताधिपते:

(क) हंसस्य (ड) चित्ररथस्य

(13) भासस्य कति नाट्यग्रन्था: उपलभ्यन्ते ?

(अ) 7 (ब) 10

(क) 13 (ड) 23

(14) रूपकस्य कति भेदा: भवन्ति ?

(अ) 5 (ब) 10

(क) 15 (ड) 22

(15) नाट्यशास्त्रस्य प्रणेता क: ?

(अ) वामन: (ब) भामह:

(क) भरतमुनि: (ड) विश्वनाथकविराज:

(16) लावणक-ग्राम: कुत्र प्राप्यते ?

(अ) विक्रमोर्वशीये (ब) मालविकाग्निमित्रे

(क) स्वप्नवासवदत्ते (ड) दरिद्रचारुदत्ते

(17) 'अर्थो हि कन्या परकीय एव' शाकुन्तले कस्येयमुक्ति: ?

(अ) शार्ङ्गरवस्य (ब) शारद्वतस्य

(क) कण्वस्य (ड) गौतम्या:

(18) वेणीसंहारे नाटके अंगीरस:

(अ) श्रृंगार: (ब) करूण:

(क) वीर: (ड) बीभत्स:

(19) मालविकाग्निमित्रस्य विदूषक: क: ?

(अ) वसन्तक: (ब) गौतम:

(क) माधव्य: (ड) मैत्रेय:

(20) मालविकाया: नाट्याचार्य: क: ?

(अ) गणदास: (ब) वीरसेन:

(क) वसुमित्र: (ड) हरदत्त:



http://www.sgbauonline.com/